বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## M.A. Examinations 2020
## Semester IV
## Subject: SANSKRIT
## Paper: SAN-403

(Theory)

**Full Marks: 40Time: 2HRS.**

*Candidates are required to give their answers in their own words as far as practicable.*

Answer any one question from Group A or B:

**Group-A**

**यथेच्छमेकः प्रश्नः संस्कृतेन देवनागर्या च समाधेयः –**

1. बुद्धचरितमहाकाव्यस्य तृतीयसर्गमवलम्ब्य महाकवेरश्वघोषस्य रचनाशैली विचार्यताम्।
2. बुद्धचरितमहाकाव्यस्य महाकाव्यत्वं कथं संगच्छते- विचार्यताम्।
3. बुद्धचरितमहाकाव्यस्य तृतीयसर्गस्य नामकरणस्य सार्थकत्वं दार्शनिकत्वं च प्रतिपाद्येताम्।
4. सिद्धार्थस्य मनसि कथं संवेगोत्पत्तिः जातेति सयुक्तिकं प्रस्तूयताम्।
5. बुद्धचरितमहाकाव्यस्य तृतीयसर्गमनुसृत्य सिद्धार्थस्य विहारयात्रां वर्णयन्तु।
6. बुद्धचरितस्य तृतीयसर्गगतानां पौराङ्गनानां वर्णनां कुरुत।
7. बाणोच्छिष्टं जगत् सर्वम्- इत्युक्तेः याथार्थ्यं प्रतिपाद्यताम्।
8. बाणभट्टमनुसृत्य प्रभाकरवर्धनस्य अन्तिमावस्था उपस्थाप्यताम्।
9. हर्षचरितपञ्चमोच्छवासस्य कथासारः लिख्यताम्।
10. कुरुङ्गकः कः? स कीदृशीं वार्तां सूचयति हर्षाय? हर्षेण दृष्टं धवलगृहस्य करुणदृश्यमुपस्थाप्यताम्।
11. महाकवेः बाणभट्टस्य कृतीनां परिचयो दीयताम्।
12. हर्षचरिते पञ्चमोच्छवासस्य सांस्कृतिकं वैशिष्ट्यं किमस्ति- विचार्यताम्।

**Group-B**

**यथेच्छमेकः प्रश्नः संस्कृतेन देवनागर्या च समाधेयः –**

1. यथासम्भवं प्रमाणप्रमेयेषु अन्तर्भवन्तोऽपि संशयादीनां कथं पृथक्तयोल्लेखः?
2. संशयवादिनां शून्यवादिनाञ्च मते प्रमाणस्य प्रामाण्यमस्ति न वेति विचार्य भाष्यकारमतं स्पष्टीक्रियताम्।
3. न्यायसूत्राणाम् आद्यानि विंशतिसूत्राणि उल्लिख्य तेषां सरलार्थः लिख्यताम्।
4. नैयायिकैः स्वीकृतेषु पदार्थेषु वितण्डा सप्रयोजना उत अप्रयोजना- विचार्यताम्।
5. नैयायिकैः कति पदार्थाः स्वीकृताः? के च ते? तत्र प्रमाणपदार्थस्य प्रामाण्यकल्पने किंविधं प्रमाणं स्वीकृतम्? तत् सविस्तरम् आलोच्यताम्।
6. भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यते- इति भाष्यांशः व्याख्यायताम्।
7. प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्- व्याख्यायताम्।
8. प्रशस्तपादभाष्यानुसारं महोदयस्वरूपं निरूप्यताम्।
9. द्रव्यादीनां पदार्थानां क्रमोद्देशे किं कारणम्? आलोच्यताम्।
10. पदार्थधर्माणां संग्रहपरो ग्रन्थो महोदयहेतुरिति वचनमुपपद्यते न वेति विचार्यताम्।
11. विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेदपक्षान्न भिद्यते- कस्योक्तिरियम्? वैशेषिकैः एतन्मतं स्वीकृतं न वेति विचार्यताम्।
12. तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव- इति भाष्यांशः व्याख्यायताम्।

Vidyasag